53 The etymology given above is not acceptable as it goes against the tradition of Indian etymologists and the rule—संज्ञासु धातुरूपाणि and is ungrammatical. However, it wonderfully agrees in a way with the etymology given by Bhānujī who however derives the word from two roots *Tam* and *Bul*. The Austro-Asiatic words might possibly be the corrupt forms of the word Tāmbūla. The root *Bul* is Sanskrit and is common in Indian vernaculars also. The study of the languages concerned is in its infancy at present and therefore it is not possible to say with certainty about the etymology given above and the conclusion drawn from it that the etymological evidence favours an Austro-Asiatic rather than an Indo-Aryan home where the custom of chewing Tāmbūla originated.

The origin of the custom

54. The custom of chewing Tāmbūla is not only current throughout India but outside also in countries like Southern China, Siam, Indo-China, Malaya, all the East Indian Archipelago, Micronesia, New Guinea, and the remainder of Melanesia as far as the tiny volcanic island of Tikopia. Under the circumstances, it becomes impossible to fix up the area where exactly the custom originated.

55. Penzer, after taking into consideration all the available evidences, offers the following remarks :—

" There appears to be no satisfactory evidence on the question. All we can say is that if the custom did not originate on the coasts of Southern India, it was imported from the East Indian Archipelago at a very early date. "

His statement is conditional and, therefore, inconclusive.

56. The origin of Tāmbūla given in the Nāgara Khaṇḍa of Skanda Purāṇa, though not very authentic, implies that there was a tradition according to which Tāmbūla-creeper was brought from outside. The epithet Nāgavallī (नागलोकस्य वल्ली) can suggest Malabar, the home of cobras and elephants, as the original home of the creeper. But such conjectures have no value and the problem remains unsolved for want of concrete evidence.

Tāmbūla and Tantras

57. There is no reference to Tāmbūla in Vedic Saṁhitās, Brāhmaṇas, Smārta and Dharma Sūtras and Smṛtis of Manu and Yājñavalkya which are purely Vaidika. It shows that the custom of chewing Tāmbūla was not prevalent among the Vaidikas *i. e.* Brāhmaṇas, Kṣatriyas and Vaiśyas. Orthodox Vaidika Brāhmins even to-day hate the use of Tāmbūla.

58 Among the Smṛtis, Samvarta, Laghuhārīta, Laghuāśvalāyana, and Auśanasa refer to the custom of chewing Tāmbūla. All these Smṛtis are influenced by Tantras and do not represent the orthodox Vedic view.

59 Tāmbūla is very popular with the Tāntric cult. Tāntrika literature of all schools *i. e.* Vaiṣṇava, Śaiva, Śākta, Gāṇapata, and Saura and religious literature influenced by Tantras *i. e.* Purāṇas, Smṛtis etc. contain many references and rules prescribing and prohibiting the use of Tāmbūla. The earliest known works on Tantras are not available now. However the Tantric cult was prevalent in India even in pre-historic times and was followed by Śūdras and lower classes of people. Naturally, therefore, the use of Tāmbūla in religious rites and the custom of chewing it must have been current among them. The Buddhist cult afterwards gave a death blow to the Vedic cult which could not be revived and brought to its original form even by Kumārila Bhaṭṭa and

Śaṅkarācārya. The Kṣatriyas and Vaiśyas had given up Vedic studies and Saṁskāras and consequently were initiated by the Brāhmaṇas into the Tāntric cult. The Brāhmaṇas also, who followed the Vedic cult had to perform Tāntric rites for Kṣatriyas and Vaiśyas on whom they were dependent for their livelihood. Consequently they also slowly assimilated the Tāntric cult and gave up Vedic rites with the result that to-day Tantric cult prevails throughout India. With the assimilation of Tāntric cult, the use of Tāmbūla also became popular among the first three classes of people. However, the opposition from the staunch followers of the Vedic school was so much that they prohibited Brahmacārins or the Vedic students, yatis or ascetics and widows to use Tāmbūla. The Gṛhasthas or the house-holders only were allowed to use it.

60. Thus it will be seen that Tāmbūla was introduced in religious rites by the Tāntrikas who had a long tradition behind them. It would be, therefore, improbable that the Ācāryas would introduce the leaf of a foreign creeper in their religious rites. I am, therefore, inclined to believe that Tāmbūla must be Indian. Its use in religious rites and the custom of chewing it was common among Śūdras and other lower classes following the Tāntric cult. It slowly became popular with all with the popularity of the Tāntric cult and spread throughout India and outside.

61. There is no necessity to summarise here the rules prescribing and prohibiting the use of Tāmbūla as they are too well known.

62. In conclusion, I may say that I have placed before scholars all the relevant and controversial points on the subject for their dispassionate consideration.

63. I must, now, express my feelings of gratitude to those who helped me in this work. My thanks are due to Śrīmatī Hansaben Mehta, Vice-Chancellor, M. S. University of Baroda for her encouragement to critical research, and her able guidance with keen interest. I have no words to thank my revered Professor who fortunately happens to be the Director of this Institute and the General Editor of this series for the inspiration, guidance and help given by him. I am thankful to Dr. U. P. Shah, the learned Dy. Director of this Institute for his hearty co-operation and help. I have also to thank Manager, M. S. University Press for his sincere co-operation in printing the work with utmost care. Lastly my thanks are due to Dr. P. K. Gode, the learned Curator of the Bhandarkar Oriental Research Institute, Poona, who was kind enough to supply me with all his articles on Tāmbūla, for his appreciation of my work.

Oriental Institute,
Baroda, Dated 17-9-1957. J. S. PADE

श्रीः

ताम्बूलमञ्जरी

अथ ताम्बूलप्रकरणम्।

ताम्बूलपत्राणि हरन्ति वातं
पौगं फलं हन्ति कफं च ह्यम्।
चूर्णं निहन्यात् कफवातमुच्चै-
र्हन्याच्च पित्तं खदिरस्य सारः ॥ १ ॥

इत्थं हि ताम्बूलमुदाहरन्ति
दोषत्रयस्यापि निवारणाय।
अतो हि सर्वे सुखिनो मनुष्या
अहर्निशं प्रीतिकरं भजन्ते ॥ २ ॥

धन्वन्तरौ।

ताम्बूलं कटु तिक्तमुष्णमधुरं क्षारं कषायान्वितं
वातघ्नं कफनाशनं कृमिहरं दुर्गन्धिनिर्णाशनम्।
वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं
ताम्बूलस्य सखे त्रयोदशगुणाः स्वर्गेऽपि ते दुर्लभाः ॥ ३ ॥

अभ्यङ्गे निशि माङ्गल्ये प्रभाते भोजनान्तिके।
ताम्बूलभक्षणं श्रेष्ठमित्याचार्या वदन्ति हि ॥ ४ ॥

सार्धमासद्वये दद्यात् ताम्बूलं प्रथमं शिशोः।
कर्पूरादिकसम्मिश्रं ताम्बूलं योजयेद्भिषक् ॥ ५ ॥

मुहूर्तः।

मूलाश्विमैत्रकरतिष्यहरीन्दु(न)भेषु
पौष्णे तथा मृगशिरोऽदितिवासवेषु।
अर्केन्दुजीवभृगुबोधनवासरेषु
ताम्बूलनूतनदलाद्यशनं शिवाय ॥ ६ ॥

भरद्वाजः।

क्रमुकं पञ्चनिष्कं स्यात् ताम्बूल्याश्च पलद्वयम्।
गुञ्जाद्वयं चूर्णमानं ताम्बूलक्रममुत्तमम् ॥ ७ ॥

त्रिमल्लटीकायाम् ।

पूगार्धं सप्तपर्णानि चूर्णं गुञ्जोन्मितं तथा ।
माषमात्रं तु खदिरं ताम्बूलं तद्विदो विदुः ॥ ८ ॥

राजनिघण्टौ ।

द्विपत्रमेकपूगं च सचूर्णखदिरं च तत् ।
गायत्रीगुटिकाचूर्णं पूगं नागलतादलम् ।
नात्युच्चैर्नातिनीचैश्च पर्णानामधिकं वरम् ॥ ९ ॥
अर्धपूगं सखदिरं रक्तिकं(दं)योज्यचूर्णयुक् ।
यथोत्तरं यथास्वादमधिकाङ्केन योजितम् ॥ १० ॥
समपत्रः(त्र)फले रागे(गो) विरागस्तु फलेऽधिके ।
चूर्णाधिक्ये तु दुर्गन्धः पत्राधिक्ये सुगन्धता ॥ ११ ॥

अन्यच्च ।

पर्णाधिक्ये दीपनी रङ्गदात्री
पूगाधिक्ये रूक्षदा कृच्छ्रदात्री ।
चूर्णाधिक्ये सोष्णदुर्गन्धदात्री
साधिक्ये चेत् खादिरे शोषदात्री ॥ १२ ॥
युक्तेन चूर्णेन करोति रागं
रागक्षयं पूगफलातिरिक्तम् ।
चूर्णाधिकं वक्त्रविगन्धिकारि
पत्राधिकं साधु करोति गन्धम् ॥ १३ ॥
आमोदनं दीपनपाचनं च
प्रमेहमूत्रामयनाशनं च ॥
प्रभाते पूगमधिकं मध्याह्ने खादिरं तथा ।
निशायां तु तथा चूर्णं ताम्बूलं भक्षयेत् सदा ॥ १४ ॥
दिवा खदिरसारं तु ताम्बूलं तु सुशोभनम् ।
रात्रौ खदिरसारं तु शक्रस्यापि श्रियं हरेत् ॥ १५ ॥
प्रातः पूगाधिकं कुर्याच्चूर्णाधिक्यं तु मध्यमे ।
रात्रौ पत्राधिकं कुर्यात् ताम्बूलस्येति लक्षणम् ॥ १६ ॥
निशि पर्णाधिकं भक्षेत् तस्य लक्ष्मीर्विवर्धयेत्(ते) ।
ताम्बूलमुच्यते चैतत् कामकृत् पाचनं सरम् ॥ १७ ॥

पर्णाधिक्यात् पित्तकरं पूगाधिक्यात् कफप्रदम् ।
शुक्रहृत् खदिराधिक्यात् तस्मात् तदुचितं वरम् ॥ १८ ॥
अनिधाय मुखे पर्णं पूगं खादति यो नरः ।
सप्तजन्मदरिद्रत्वमन्ते न स्मरते हरिम् ॥ १९ ॥
आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता ।
पर्णमूले भवेद्व्याधिः पर्णाग्रे चायुषः क्षयः ॥ २० ॥
चूर्णपर्णं हरेल्लक्ष्मीं शिरा बुद्धिविनाशिनी ।
तस्मादग्रं च मूलं च शिरां चैव विशेषतः ॥ २१ ॥
चूर्णपर्णं वर्जयित्वा ताम्बूलं खादयेन्नरः ।
तर्जन्या चूर्णमादाय ताम्बूलं न तु खादयेत् ॥ २२ ॥
यदि खादयते मूढो रौरवं नरकं व्रजेत् ॥ २३ ॥
पर्णाग्रे वसते लक्ष्मीः पर्णमूले सरस्वती ।
पर्णपृष्ठे वसेद्गौरी चूर्णपर्णेषु चण्डिका ॥ २४ ॥

ताम्बूल्यग्रे निवसति रमा मध्यतो वागधीशा
पृष्ठे ज्येष्ठा हिमगिरिसुता वामभागेऽन्यतो भूः ।
अन्तर्विष्णुर्बहिरुडुपतिः शङ्करश्चैव कोणे
मूले मृत्युर्वसति मदनः सर्वपत्रेषु पुंसाम् ॥ २५ ॥

इति योगमालायाम् ।

अङ्गुष्ठचूर्णसंयुक्तं पर्णपृष्ठे तु लेपनम् ।
तत् पर्णं खादयेत् तेन सोमपानं दिने दिने ॥ २६ ॥

पापम् ।

कनिष्ठानामिकामध्यातर्जन्यङ्गुष्ठयोगतः ।
शोको हानिस्तथा मृत्युरैश्वर्यं चौर्यमेवच ॥ २७ ॥

अन्यः ।

अङ्गुष्ठस्य तु लेपेन सर्वसिद्धिप्रदायकम् ।
जयश्रीवस्त्रलाभादि भविष्यति न संशयः ॥ २८ ॥
पूगं च शकलीकृत्य खादिराक्तं सुपर्णकम् ।
पिच्छिलं चूर्णसंयुक्तं ताम्बूलं खादयेत् सुधीः ॥ २९ ॥

निषेधः ।

वामहस्तेन नो खादेत् स्त्रीहस्तेन तथैव च ।
यदि खादयते मूढस्तस्य लक्ष्मीर्विनश्यति ॥ ३० ॥
म्लेच्छहस्ताच्छत्रुहस्ताच्छाङ्कितस्य जनस्य च ।
अथ वैदग्धहस्तस्थस्ताम्बूलो हि निषिध्यते ॥ ३१ ॥

ताम्बूलपत्रदानाविवेकः ।

शतपत्राणि देवेशि चक्रवर्तिवराय च ।
गुरुभ्यः सम्प्रदातव्या द्वात्रिंशत्पर्णवीटिका ॥ ३२ ॥
अष्टाविंशतिर्भूपेभ्यो बान्धवेभ्यो दशाष्टकम् ।
जामात्रे पक्षपर्णानि वसु द्वादश वा प्रिये ॥ ३३ ॥
पञ्चविंशतिः शक्तिभ्यः पुत्रेभ्यस्तत्वसङ्ख्यया ।
षट् पर्णानि च शत्रुभ्यस्तुरीयं दानमुत्तमम् ॥ ३४ ॥
पर्णत्रयं शत्रुपक्षे दशपर्णारिवैश्ययोः ।
वीरेभ्यः षोडश शिवे दिव्यौघे वसुपीठ(४८) युक् ॥ ३५ ॥
तदर्धं चैव सिद्धौघे मानवौघे तदर्धकम् ।
भृत्येभ्यः सप्तपर्णानि कन्यायै पञ्चविंशतिः ॥ ३६ ॥
चन्द्रयुक्तं महेशानि पौत्रेभ्यो दश पञ्च च ।
स्नुषायै त्रिंशतिः शिवे दास्यै चैव चतुर्दश ॥ ३७ ॥
अन्येभ्यः परमेशानि विंशत्पर्णानि दापयेत् ।
अग्रदानं च शत्रुभ्यो वक्रदानं सुमित्रके ॥ ३८ ॥
तिर्यग्दानं सेवकादौ यथायोगेन योजयेत् ।
इति सङ्क्षेपतः प्रोक्तं सिद्धियोगं शृणु प्रिये ॥ ३९ ॥

इति पत्रदानम् ।

प्रातः अञ्जनानन्तरं धावनादिक्रिया प्रशस्ता । तदाह ।
ततो धावनगण्डूषधूमताम्बूलभाग् भवेत् ।
रुचिवैशद्यसौगन्ध्यमिच्छन् वक्त्रेण धारयेत् ॥ ४० ॥
जातीलवङ्गकर्पूरकङ्कोलकटुकैः सह ।
ताम्बूलीनां किसलयं हृद्यं पूगफलान्वितम् ॥ ४१ ॥

कटुकैर्लताकस्तूरीफलैरिति हेमाद्रिः ।

धूमेनापोह्य हृद्यैर्वा कटुतिक्तकषायकैः ।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः ॥ ४२ ॥
पूगैः कङ्कोलकर्पूरलवङ्गसुमना(नः)फलैः ।
फलैः कटुकषायैर्वा मुखवैशद्यकारकैः ॥ ४३ ॥
ताम्बूलेन विना जिह्वा जडीभूता सरस्वती ।
बहिर्न याति सहसा नग्ना कुलवधूरिव ॥ ४४ ॥
कर्पूरं जातिकङ्कोलं लवङ्गं कटुकाह्वयम् ।
सचूर्णपूगैर्विहितं तन्त्रं ताम्बूलजं शुभम् ॥ ४५ ॥
सुपूगं च सुपत्रं च चूर्णखादिरसंयुतम् ।
अदत्वा द्विजदेवेभ्यो ताम्बूलं वर्जयेद् बुधः ॥ ४६ ॥
नैवेद्यमर्पयेच्चैव ताम्बूलं मुखरोचकम् ।
ताम्बूले योजयेद् द्रव्यं चिक्कणं क्रमुकं तथा ॥ ४७ ॥
खदिरश्चूर्णकं जातीत्वक् च जातीफलं तथा ।
लवङ्गैला(लं)नारिकेरबीजस्य शकलं लघु ॥ ४८ ॥
स्वर्णरौप्याणि पत्राणि कर्पूरः केसरं तथा ।
जातानि मागधे देशे नागवल्लीदलानि च ॥ ४९ ॥

स्कान्दे श्रावणमाहात्म्ये चूडामणौ ।

ताम्बूलं स्वर्णवर्णं क्रमुकफलयुतं साग्र्य(ग्र)मग्र्यं गृहीतं(त्वा)
कर्पूरेणाण्डजाभ्यां कृतखदिरवटीसौरभेणातिपूर्णम् ।
चूर्णं प्रावाणजातं शशधरकिरणप्रोज्वलं तेन साकं
दत्त्वा विप्राय पूर्वं तदनु नरपतिर्भक्षयेदाप्तदत्तम् ॥ ५० ॥
नराभिषेकाशनवान्तिकर्मप्रान्तेऽथ ताम्बूलमतिप्रशस्तम् ।
कर्पूरकङ्कोललवङ्गपूगजातीफलैर्नागलतादलाक्तैः ॥ ५१ ॥
शुद्धाश्मचूर्णं खदिरस्य सारः
कस्तूरिकाचन्दनमिश्रचूर्णम् ।
ताम्बूलमेतत् प्रवदन्ति राज्ञां
सौभाग्यदं कान्तिसुखप्रदं च ॥ ५२ ॥

चूडामणौ ।

कर्पूरकङ्कोललवङ्गपूगजातीफलैर्नागरखण्डपर्णैः ।
शुद्धाश्मचूर्णं खदिरस्य सारं ताम्बूलमेतन्नवधा प्रसिद्धम् ॥ ५३ ॥

ताम्बूलपूगं खदिरं लवङ्गं
जातीफलैलात्वक्(च)पत्रिकाद्याः ।
सन्नागवल्ल्या(ल्ली)दलचूर्णयुक्तं
वातामकङ्कोलमृगि(ग)स्तृणोराट्(त्थम्) ॥ ५४ ॥

बोपदेवः ।

अच्युतः ।

सम्पत्त्यां नागवल्लीविशिर(शद)दलकुलं पूगखण्डं सुधेषत्
सारोऽल्पः खादिरोत्थो मृगमदपिशुनः स्वर्णवातामकभ्रः ।
कङ्कोलं जातिपत्रं फलमपि च तथैलाफलं सल्लवङ्गं
ताम्बूले सम्प्रयोज्या इति मदनमितास्तत्प्रवृध्यै पदार्थाः ॥ ५५ ॥

ताम्बूलगतचूर्णेन मुखदाहे काशिराजः ।

मुखं दह्यते चूर्णकेन प्रमादाद्
यदा नागवल्लीदलस्थेन पुंसः ।
सितातैलसौवीरकैस्तन्निवृत्तिः
पृथक् तस्य गण्डूष एवोपदिष्टः ॥ ५६ ॥
गले उत्तरे लागली जे सुपारी
तये औसरी धर्मगन्धा स्विकारी ।
मुखे ताम्बुला चर्वणीं दन्तमाला
सुतैले तयाशीच गण्डूष घाला ॥ ५७ ॥

एलालवङ्गकर्पूरकस्तूरीकेसरादिभिः ।
जातीफलदलैः पूगैर्लाङ्गल्यूषणनागरैः ।
चूर्णैः खदिरसारैश्च युक्ता कर्पूरवीटिका ॥ ५८ ॥
आद्यं तत् पिक्कं त्याज्यं महादोषकरं च यत् ।
द्वितीयं दुर्जरं भेदी तृतीयाद्यमृतोपमम् ॥ ५९ ॥

भुक्त्यनन्तरं ताम्बूलग्रहणकालः ।

भुक्त्वान्नं सलिलं पीत्वा गृहीत्वा बहु भेषजम् ।
प्रतीक्ष्य घटिकामेकां ताम्बूलं भक्षयेन्नरः ॥ ६० ॥
ताम्बूलं नैव सेवेत क्षीरं पीत्वा तु मानवः ।
यावत्तु स्वदते क्षीरं तावदेवेति निर्णयः ॥ ६१ ॥

पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च सङ्गरे ।
सभायां विदुषां राज्ञां कुर्यात्ताम्बूलचर्वणम् ॥ ६२ ॥

इति वैद्यरत्ने ।

आलस्यविद्रध्युपजिह्विकानां
सतालुदन्तार्बुदशोणितानाम् ।
गलास्यगण्डापचितालुशोष-
श्लेष्मामयानां च भृशं प्रशस्तम् ॥ ६३ ॥

कामं प्रदीपयति रूपमभिव्यनक्ति
सौभाग्यमावहति वक्त्रसुगन्धितां च ।
ओजं करोति कफजांश्च निहन्ति रोगां-
स्ताम्बूलमेवमपरांश्च गुणान् करोति ॥ ६४ ॥

ग्रहणगुणाः ।

वर्ज्यानि ।

ताम्बूलं क्षतपित्तास्ररूक्षोत्कुपितचक्षुषाम् ।
विषमूर्च्छामदार्तानामपथ्यं शोषिणामपि ॥ ६५ ॥

त्रिण्मूर्च्छा चो(सू)पवासार्तो मेही मुखगदी क्षयी ।
भूतापस्मारके कष्टे तिमिरी कृच्छ्रहृद्गदी ॥ ६६ ॥

ताम्बूलं नैव सेवेत सुविरक्तः क्षुधातुरः ।
प्रमेही मूत्रकृच्छ्री च क्षीरमभ्यवहृत्य च ॥ ६७ ॥

तद्वक्त्रपाके नयनप्रमाथे शिरोविकारे मदिरात्यये च ।
विषे क्षये शोणितपित्तरोगे व्रणे हितं नो तरुणज्वरार्ते ॥ ६८ ॥

दन्तदौर्बल्यपाण्डुत्वनेत्ररोगबलक्षयान् ।
वितनोत्यास्यरोगांश्च ताम्बूलमतिसेवितम् ॥ ६९ ॥

अक्षिरोगे क्षये पाण्डुरोगोत्रमयवृनि च । (गान्त्रामयवानपि)
अपस्मारी श्वासकासी हृद्रोगी रक्तपित्तकी ॥ ७० ॥

ग्रहणीवानतीसारे ताम्बूलं परिवर्जयेत् ।
विद्याकामो दिवा रात्रौ ताम्बूलं न तु खादयेत् ॥ ७१ ॥

ब्रह्मचारी यतिश्चैव विधवा च रजस्वला ।
प्रत्येकं मांसतुल्यं तं(तन्) मिलितं सुरया समम् ॥ ७२ ॥

प्रतिप्रसव: ।

नेत्ररोगहरं रुच्यं श्लेष्मरोगहरं शुभम् ।
नागरस्वरसं पथ्यं ताम्बूलं घनसारयुक् ॥ ७३ ॥
पत्रं फलं खादिरं च चूर्णं चैव चतुर्थकम् ।
पञ्चमं तु मुखं वध्वा रागः षष्ठ उदाहृतः ॥ ७४ ॥
षडङ्गमितिदं(तत्)प्रोक्तं षडैश्वर्यप्रदायकम् ।
षडैश्वर्यादुल्लवश्ये(दुःखवश्या-दुपवसे)त्तत्र लक्ष्मीर्निरन्तरम् ॥ ७५ ॥
पानीयं स्यान्न सेव्यं विषमिव गग(र)दं मैथुनान्ते मुहूर्तं
प्रस्रावान्ते मुहूर्तं पलदशकमितं पायसे भोजने च ।
अध्वान्ते चौषधान्ते त्रिघटिपरिमितं वर्जयेदम्बुपानं
धारोष्णान्तेऽर्धयामं पलदशकमितं ताम्बुलं मूलकान्ते ॥ ७६ ॥
पर्णानि पूगखण्डानि चूर्णं च खदिरं शुभम् ।
कर्पूरैलालवङ्गादिजातीफलतजत्वचः ॥ ७७ ॥
चतुर्भिर्मिलितैर्द्रव्यैस्ताम्बूलं मम वल्लभे ।
मृगनाभिर्मरीचानि मुरमांसनखांस्तथा ॥ ७८ ॥

अथ ताम्बूलपत्रनानाजातिगुणा देशविशेषेण ।

अथ भवति नागवल्ली ताम्बूली पर्ण(फणि)लता च सप्तशिरा ॥
पर्णलता फणिवल्ली भुजगलता भक्ष्यवल्ली च ॥ ७९ ॥
सा च श्रीवाटाम्लवाटादिनानाग्रामस्तोमाख्यानभेदाद्विभिन्ना ।
एकाप्येषा देशमृत्स्नाविशेषान्नानाकार्यं याति काये गुणे च ।

साधारणनामगुणाः ।

नागवल्ली कटुस्तीक्ष्णा तिक्ता पीनसवातजित् ।
कफकासहरा रुच्या दाहकृद्दीपनी परा ॥ ८० ॥

इति गुणाः ।

श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा ।
रसाढ्या च सरा रुच्या विपाके शिशिरा स्मृता ॥ ८१ ॥

श्रीवाटपर्णम् ।

स्वाद्वम्लवाटी(स्यादम्लवाटी)कटुकाम्लतिक्ता
रूक्षा तलो(थो)ष्णा मुखपाककर्त्री ।
विदाहपित्तास्रविकोपिनी च
विष्टम्भदा वातनिबर्हिणी च ॥ ८२ ॥

आम्बाडपर्णम् ।

सप्तली (सी) मधुरा तीक्ष्णा कटु (टू) रूक्षा च पाचनी ।
कुष्ठोदरहराऽऽध्मानं नाशयेद्रुचिदीपिनी ॥ ८३ ॥

सप्तसीपर्णम् ।

अन्यत्र ।

गुहागरे सप्तशिरा प्रसिद्धा
तत्पर्णजीर्णा (सा जीर्णपर्णा)ऽतिरसा(ऽति)रुच्या ।
सुगन्धितीक्ष्णा मधुरातिहृद्या
सन्दीपनी पुंस्त्वकरातिरुच्या ॥ ८४ ॥

गुहागरपर्णम् ।

नाम्ना याम्लरसा सुतीक्ष्णमधुरा रुच्या हिमा दाहनुत्
पित्तोद्रेकहरा सुदीपनकरी बल्या मुखामोदिनी ।
श्रीसौभाग्यविवर्धिनी मदकरी राज्ञां सदा वल्लभा
गुल्माध्मानविबन्धजिच्च कथिता सा मालवे तु स्मृता ॥ ८५ ॥

मालवदेशपर्णम् ।

अङ्घ्रि(न्ध्रे) पु (प) ष्क (टु) लिका नाम कषायोष्णा कटुस्तथा ।
मलापकर्षा कण्ठस्य पित्तकृद्वातनाशिनी ॥ ८६ ॥

आन्ध्रदेशे पटुकुलीकुलीपर्णम् ।

द्वै (हो) सणी कटुका तीक्ष्णा हृद्या दीर्घदला च सा ।
कफवातहरा रुच्या कटुर्दीपनपाचनी ॥ ८७ ॥

होसणीयपर्णम् ।

सद्य: शो (द्यश्लो)धि (टि) तभक्षितं मुखरुजाजाड्याप (व) हं दोषकृ-
द्दाहा (द्वाता) रोचकरक्तदाहमलकृद् विष्टम्भवान्तिप्रदम् ।
यद्द्वयो जन (ल) पानयो (पो) षितरसं तच्चोचि (रा) न्नो (त्रो) चि (टि) तं
ताम्बूलीदलमुत्तमं च रुचिरं बल्यं त्रिदोषार्तिनुत् ॥ ८८ ॥

कृष्णशुभ्रपर्णगुणा: ।

कृष्णं पर्णं तिक्तमुष्णं कषायं
धत्ते दाहं वक्त्रजाड्यं मलं च ।

शुभ्रं पर्णं श्लेष्मवातामयघ्नं
पथ्यं रुच्यं दीपनं पाचनं च ॥ ८९ ॥
शिरापर्णं तु शैथिल्यं कुर्यात्तस्यास्यहृद्भवा: (वम्) ।
शीर्ण (र्णं) त्वा (त्व) द्दो (ग्दो) षदं तस्य भक्षिते तु सितासिते ॥ ९० ॥
ताम्बूलवल्लिकापत्रं कटु पाकरसो(सौ)षणम् ।
तीक्ष्णोष्णं तुवरं क्षारं दीपनं विशदं सरम् ॥ ९१ ॥
रोचनं स्रंसनं स्वर्यं रक्तपित्तविवर्धनम् ।
कफवातास्रदौर्गन्ध्यकण्डूक्लेदमलापहम् ॥ ९२ ॥

रुचिवधूगलरत्नमालायाम् ।

शुकपतगपुरन्ध्रीफण्डु(गण्ड)पाण्डूनि चञ्चत्-
कनककरकनालोद्धारयत्नोचितानि ।
त इह खलु लभन्ते नागवल्लीदलानि
त्रिपुररिपुपदाग्रे ये नु कम्रा विनम्रा: ॥ ९३ ॥

जीर्णपर्णगुणा: वैद्यरत्ने ।

पर्णं पुराणमकटु क्षुल्लकं तनुपाण्डुरम् ।
विशेषाद्गुणवद् वेद्यमन्याधी(न्यद्गी)नगुणं स्मृतम् ॥ ९४ ॥

अथ पूगम् ।

पूगवृक्षस्य निर्यासो हिम: सम्मोहनो गुरु: ।
विपाके सोष्णक: क्षार: साम्लो वातघ्नपित्तल: ॥ ९५ ॥
खेचरी मधुरा रुच्या कषायाल्पकटुस्तथा ।
पथ्या च कफवातघ्नी सारिका मुखदोषनुत् ॥ ९६ ॥

खेचरी भाषा ।

नैल्वतं मधुरं रुच्यं कण्ठशुद्धिकरं लघु ।
त्रिदोषशमनं दीप्यं रसालं पाचनं सरम् ॥ ९७ ॥

नैल्वतम् ।

गौल्यं गुहारं श्लक्ष्णं (च) विपाके कटु पाचनम् ।
विष्टम्भजठराध्मानहरणं द्रावणं लघु ॥ ९८ ॥

गुहारचिकणा ।

घोण्टा कटुकषायोष्णा कठिना रुचिकारिणी ।
मलविष्टम्भशमनी पित्तकृद्दीपनी च सा ॥ ९९ ॥

गोण्टुलाक ।

पूगीफलं चौउलिसंज्ञकं यत्
(तत्) कोङ्कणेषु प्रथितं सुगन्धि ।
श्लेष्मापहं दीपनपाचनं च
बलप्रदं पुष्टिकरं रसाढ्यम् ॥ १०० ॥

चउली सुपारी ।

यद्धोसणे वल्लगुणाभिधानकं (क–)
ग्रामोद्भवं पूगफलं त्रिदोषनुत् ।
आमापहं रोचनरुच्यपाचनं
विष्टम्भतुन्दामयहारि दीपनम् ॥ १०१ ॥

होसपाटणपूग(म्) ।

चन्द्रापुरोद्भवं पूगं कफघ्नं मलनाशनम् ।
कटु स्वादु कषायं च रुच्यं दीपनपाचनम् ॥
(पूगं सम्मोहकृत् सर्वं कषायं स्वादु रेचनम् ।)
त्रिदोषशमनं रुच्यं वक्त्रक्लेदमलापहम् ॥ १०२ ॥

आमं पूगं कषायं मुखमलशमनं कण्ठशुद्धिं विधत्ते
रक्तामश्लेष्मपित्तप्रशमनमुदराध्मानहारं सरं च ।
शुष्कं कण्ठामयघ्नं रुचिकरमुदितं पाचनं रेचनं स्यात्
पर्णो (र्णै) तो (र्नो) युज्यते चेज्झटिति वितनुते पाण्डु वातं च शोफम् ॥ १०३ ॥

रोचनं मोहनं हृद्यं कफपित्तनिबर्हणम् ।
दीपनं वक्त्रवैरस्यमलदौर्गन्ध्यनाशनम् ॥ १०४ ॥

आर्द्रं तु गुर्वभिष्यन्दि दृष्ट्यग्निं (ग्नि-) वृद्धिकृत् परम् ।
शुष्कं तु वातलं स्निग्धं त्रिदोषशमनं परम् ॥ १०५ ॥

स्विन्नपूगं त्रिदोषघ्नं पक्वं शुष्कं तु वातुलम् ।
पक्वार्द्रं गुर्वभिष्यन्दि बलार्द्रं कफपित्तनुत् ॥ १०६ ॥

पूगस्य दृढमध्यं यच्छ्रेष्ठं नानाविधं हि तत् ।
पाकदेशादिभेदेन चिक्कणं सर्वदोषजित् ॥ १०७ ॥

कृमिहृत् पूगपुष्पं तु कषायं मधुरं गुरु ।
पूगश्वेता परा प्रोक्ता श्यामवर्णा च चिक्कणा ॥ १०८ ॥

पूगीयुगं (पूगं गुरु) हिमं रूक्षं कषायं कफपित्तहृत् ।
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ॥ १०९ ॥

आर्द्रं तु गुर्वभिष्यन्दि वह्निदृष्टिहरं परम् ।
स्विन्नं दोषत्रयच्छेदि दृढमध्यं तदुत्तमम् ॥ ११० ॥

ताम्बूलयोग्यं क्रमुकं च तज्ञा
मासत्रयादूर्ध्वमुदाहरन्ति ।
मासे व्यतीते तु भवन्ति (योग्या-)
न्यतीव हृद्यानि मनोहराणि ॥ १११ ॥

खिन्नपूगं त्रिदोषघ्नमपक्वं दोषलं भवेत् ॥ ११२ ॥

पूगदानसङ्ख्याफलम् ।

एकद्वित्रिचतुःपञ्चषड्भिः पूगैः फलानि च (पूगीफलैः क्रमात्) ।
लाभालाभौ (लाभोऽलाभः) सुखं दुःखमायुर्मरणमेव च ॥ ११३ ॥

इति पूगगुणाः ।

अथ चूर्णजातिनामगुणदोषानाह ।
सुधा १ चूर्ण (म्) २ मौक्तिकसार (रः) ३ शैलोदरग्राव (वा) ४ ।

चूर्णं स्यादश्मसम्भवमित्यमरमाला ।

चूर्णं चार्जुनवृक्षजं कफहरं गुल्मघ्नमर्काह्वजं
शोषघ्नं कुटजं करञ्जजनितं वातापहं रुच्यदम् ।
पित्तघ्नं जलजं बलाग्निरुचिदं शैलाह्वजं पित्तदं
स्फाटिक्यं दृढदन्तपङ्क्तिजननं शुक्त्यादिकं (जं) रूक्षदम् ॥ ११४ ॥

सुन्नगुणाः ।

अन्यः ।

शुक्तिजं वातपित्तघ्नं शम्बूकं श्लेष्मरोगजित् ।
राजयोग्यं तु सर्वत्र मुक्ताचूर्णं तु वातजित् ॥ ११५ ॥

शैलोदरप्रावविशेषचूर्ण
श्रीवासतोयं घनसारपूर्णम् ।
ताम्बूलरागोदयजागरूकं
निरन्तरं पाचनजागरूकम् ॥ ११६ ॥

तमाखुगुणाः ।

द्रव्यगुणनिघण्टे(ण्टौ) ।

तमालपत्रं बहुतीक्ष्णकेन
विरेचनं वातकफं सुहृद्यम् ।
आनाहगुल्मक्षयपाण्डुरोगं
सहस्ररोगेष्व (षु) निवारणं स्यात् ॥ ११७ ॥

अथ खदिरवटीकरणम् ।

लवङ्गजातीमृगजाशशीनां
भागद्वयं जातिफलत्रयं च ।
वल्लद्वयं त्वक् च तमालपत्रं
कङ्कोलवल्ला इह तुर्यवल्लाः ॥ ११८ ॥

खैरस्य सारस्य तथाष्टभागा
भागद्वयं साधु सुचन्दनस्य ।
कृष्णागरोश्चारुतरैकभाग
एला च वल्लद्वयमुक्तचूर्णम् ॥ ११९ ॥

षड्भागिकं केसरकुङ्कुमाना-
मालोडयेत् पुष्परसेन युक्तम् ।
मासप्रयोगेण स (च) शुष्ककासं
वटीं च बध्वा चणकप्रमाणाम् ॥ १२० ॥

एषास्यवैरस्यहरातिपथ्या
भुक्तान्नजारा जठरेषु जातम् ।
वातामयं हन्ति सदा नृपाणां
ताम्बूलरागं कुरुतेऽतिरम्यम् ॥ १२१ ॥

कर्पूरसारमलये(य)द्रुकुरङ्गनाभिः (भि-)
सम्मर्दितं खदिरभूरुहसारचूर्णम् ।

यत्नेन केसरतरुप्रसवावृतं तत्
ताम्बूलरोचककरं धरणीपतीनाम् ॥ १२२ ॥

केसरतरुः केतकपत्रम् ।

खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् ।
तिक्तः कषायो मेदघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकपा (फा) न् हरेत् ॥ १२३ ॥
विट्खदिरः कटुरुष्णास्तिक्तो रक्तव्रणोऽथ (त्थ) दोषहरः ।
कण्डूतिविषविसर्पज्वरकुष्ठोन्मादभूतहरः ॥ १२४ ॥

इति सङ्क्षेपेण खदिरसारगुणाः ।

अथ कस्तूरी ।

कस्तूरी कटुका तिक्ता क्षारोष्णा शुक्रला गुरुः ।
कफवातविषच्छर्दिशीतदौर्गन्ध्यशोषहा ॥ १२५ ॥
कस्तूरिका वेधमुख्या सुगन्धा मादि(द)नीमदः ।
मार्गो दर्पो मृगमदो मृगनाभिर्मृगाण्डजः ॥ १२६ ॥
कस्तूरी मृगनाभिस्तु मदनी गन्धकेलिका ।
वेधमुख्या च मार्जारी सुभगा बहुगन्धदा ॥ १२७ ॥
सहस्रवेथी (धी) श्यामा स्यात् कामागन्धा (नन्दा) मृगाण्डजा ।
कुरङ्गनाभी ललिता मदो मृगमदस्तथा ॥ १२८ ॥
श्यामला मोदिनी चैव विज्ञेयाष्टादशाह्वया ।

गुणाः ।

कस्तूरी सुरभिस्तिक्ता चक्षुष्या मुखरोगजित् ।
किलासमुखदौर्गन्ध्यव(वा)न्धा(ता)लक्ष्मीमलापहा ॥ १२९ ॥

भेदाः ।

कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात् ।

उत्पत्तिः ।

नेपालेऽपि च काश्मीरे कामरूपे च जायते ॥ १३० ॥
साप्येका खरिका ततश्च तिलका ज्ञेया कुलत्था परा
पिण्डान्याऽपि च नायिकेति च परा या पञ्चभेदाभिधा ।
सा शुद्धा मृगनाभितः क्रमवशादेषा क्षितीशोचिता
पक्षत्यादिदिनत्रयेषु जनिता कस्तूरिका स्तूयते ॥ १३१ ॥

चूर्णाकृतिस्तु खरिका तिलका तिलाभा
कौलत्थबीजसदृशी च कुलत्थिकाया: (या)।
स्थूला ततः कियदियं किल सिद्धिकाख्या
तस्याश्च किञ्चिदधिका यदि नायिका सा ॥ १३२ ॥

परीक्षा।

या सा तिक्ता पिञ्जरा केतकीनां
गन्धं धत्ते लाघवं तोलनेन (च)।
याऽप्सु न्यस्ता नैव वैवर्ण्यमीयात्
कस्तूरी सा राज्यभोग्या प्रशस्ता ॥ १३३ ॥

अपि च।

या गन्धं केतकीनां वहति भृशतरं वर्णतः कुञ्जराभा
स्वादे तिक्ता कटुर्वा लघु परितुलिता मर्दिता चिक्कणा स्यात्।
दग्धा नो याति भस्म (भूतिं) चिमिचिमि कुरुते चर्मगन्धा हुताशे
सा शुद्धा शोभनी या मृगवरतनुजा राजयोग्या प्रदिष्टा ॥१३४॥

पाठान्तरम्।

या गन्धं केतकीनामपहरति मदं सिन्धुराणां च वर्णे (र्णं)
स्वादे तिक्ता कटुर्वा लघुरथ तुलिता मर्दिता चिक्कणा स्यात्।
दाहं या नैति वह्नौ शिमिशिमिति चिरं चर्मगन्धा हुताशे
सा कस्तूरी प्रशस्ता वरमृगतनुजा राजते राजभोग्या ॥ १३५ ॥

कस्तूरी सौरभाढ्या कटुकरसगुरुक्षारतिक्तोष्णयुक्ता
शीता दोषापहन्त्री कफपवनहरा पित्तकृच्छुक्रला च।
सन्तप्तोल्लासहेतुर्वमतु (थु) विषहरा गात्रदौर्गन्ध्यहन्त्री
तृष्णां पित्तप्रकोपं प्रशमयति भृशं हन्ति शोषं विषं च ॥१३६॥

बाले जरति च हरिणे क्षीणे रोगिणि च मन्दगन्धा (न्धयुता)।
कामातुरे च तरुणे कस्तूरी बहुलपरिमला भवति ॥ १३७ ॥

कृतका।

करतलजलमध्ये स्थापनीया महद्भिः
पुनरपि तदवश्यं चिन्तनीया मुहूर्तम्।
यदि भवति च रक्तं तज्जलं पीतवर्णं
न भवति मृगनाभिः कृत्रिमोयं विकारः ॥ १३८ ॥

अपि च ।

या स्निग्धा धूमगन्धा द(व)हति विनिहिता पीततां याद्रसोन्त-(पाथसोऽन्त-)
निःशेषं या निविष्टा भवति हुतवहे भस्मसादेव सद्यः ।
या च न्यस्ता तुलायां कलयति गुरुतां मर्दिता रूक्षतां च
ज्ञेया कस्तूरिकेयं खलु कृतमतिभिः कृत्रिमा चैव सद्यः ॥ १३९ ॥

प्रशंसा ।

शुद्धो वा मलिन(नोऽ) स्तु वा मृगमदः किं जातमेनावता
कोऽप्यस्यानवधिश्चमत्कृतिनिधिः सौरभ्यमेको गुणः ।
येनासौस्व(स्म)रमण्डनैकवसतिर्भाले कपोले गले
दोर्मूले कुचमण्डले च कुरुते सङ्गं कुरङ्गीदृशाम् ॥ १४० ॥

मुस्ता चरन्ति काश्मीरा नेपाला मांसभक्षिणः ।
ग्रन्थिपर्णकृताहाराः कामरूपोद्भवाः स्मृताः ॥ १४१ ॥
काश्मीरे पिच्छलच्छाया नेपाले चैव लोहिता ।
कामरूपोद्भवा कृष्णा कस्तूरी त्रिविधा मता ॥ १४२ ॥

अथ लताकस्तूरी ।

लताकस्तूरिका ज्ञेया कटुर्दक्षिणदेशजा ।
लताकस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा लघुः ।
चक्षुष्या छेदिनी श्लेष्मतृष्णाबस्त्यार्तिरोगजित् ॥ १४३ ॥

इति ।

सुवर्णदलगुणाः ।

शुद्धं स्वर्णदलं समस्तविषहृच्छूलाम्लपित्तापहं
हृद्यं पुष्टिकरं क्षयव्रणहरं कायाग्निमान्द्यं जयेत् ।
हिध्मानाहनिरन्तरं कफमरुन्नृणां हितं सर्वदा
तत्तद्दोषहरानुपानसहितं सर्वामयध्वंसनम् ॥ १४४ ॥

इति योगरत्नात् ।

वैद्यामृते ।

नवनीतसितामधुप्रयुक्तो वर्खो हेमभवः क्षयं क्षिणोति ।
वितथः प्रभवेदयं प्रयोगो यदि तन्मे शपथः सदाशिवस्य ॥ १४५ ॥

रौप्यदलगुणाः ।

गुरु स्निग्धं मृदु श्वेतं दाहे छेदे च यत्क्षमम् ।
वर्ण्याढ्यं चन्द्रवत्स्वच्छं तारपत्रगुणा नव ॥ १४६ ॥

योगरत्ने ।

कृत्रिमं कठिनं रूक्षं रक्त (क्तं) पित्त (पीत) दलं लघु ।
दाहे छेदे च यन्नष्टं रूप्ये दोषा दश स्मृताः ॥ १४७ ॥

इति कृत्रिमवर्खपरीक्षागुणाः ।

बदामनामगुणाः ।

ईषद्दीर्घं च वातामं मधुरं स्निग्धमज्जकम् ।

मिश्रः ।

वातादो वातवैरी स्यान् नेत्रोपमफलस्तथा ।
वाताद उष्णः सुस्निग्धो वातघ्नः शुक्रकृद् गुरुः ॥ १४८ ॥
वातादमज्जा मधुरो वृष्यः पित्तमलापहः ।
स्निग्धोष्णः कफकृच्छ्रेष्ठो रक्तपित्तविकारिणाम् ॥ १४९ ॥

कङ्कोलम् ।

कङ्कोलकं कृतफलं कङ्कोलं (कोलकं) कटुकं फलम् ।
वृष्यं स्थूलमरीचं तु कङ्कोलं माधवोषितम् ।
कोलं च कटुफलं प्रोक्तं मरिचं रुद्रसम्मितम् ॥ १५० ॥
कङ्कोलं कटु तिक्तोष्णं वक्त्रजाड्यहरं परम् ।
दीपनं पाचनं रुच्यं कफवातार्तिकृन्तनम् ॥ १५१ ॥
कङ्कोलं लघु तिक्तोष्णं तीक्ष्णं हृद्यं रुचिप्रदम् ।
कफानिलास्यदौर्गन्ध्यहृद्रोगकृमिमान्द्यजित् ॥ १५२ ॥

तृणकेसरम् ।

तृणकुङ्कुमं तृणास्तृग्(स्रं)गन्धितृणं शोणितं (च) तृणपुष्पम् ।
गन्धाधिकं तृणोत्थं तृणगौरं लोहितं च नवसंज्ञम् ॥ १५३ ॥
तृणकुङ्कुमं कटूष्णं कफमारुतशोफनुत् ।
कण्डूर्ति (ति) पामाकुष्ठामदोषघ्नं भास्करं परम् ॥ १५४ ॥

तृणकुङ्कुमं काश्मीरे प्रसिद्धम् । कुङ्कुमं केशरम् ।

ज्ञेयं कुङ्कुममग्निशेखरमसृक् काश्मीरजं पीतकं
काश्मीरं रुधिरं वरं च पिशुनं रक्तं शठं शोणितम् ।
बाल्हीकं घ(घु)सृणं वरेण्यमरुणं कालेयकं जागुडं
कान्ति वह्निशिखं च केसरवरं गौरं कराक्षीरितम् ॥ १५५ ॥

कुङ्कुमं कटुकं तिक्तं व्रण्यं व्रणविशोधनम् ।
हन्ति दोषत्रयं हिध्माशिरो(रो)गत्रमिकृमीन् ॥ १५६ ॥
कौङ्कुमं पुष्पमारक्तं गन्धवत् सूक्ष्मकेसरम् ।
काश्मीरेषु च सञ्जातं पद्मगन्धि तदुत्तमम् ॥ १५७ ॥
अतिस्थूललतारूपं मध्यमं कथयन्ति हि ।
आपाण्डुरं खरं चैव स्थूलकेसरमेत्र च ॥ १५८ ॥
मधुगन्धि च विज्ञेयं पारसीकं तु कुङ्कुमम् ।
बाल्हीकजातं विज्ञेयं कुङ्कुमं पाण्डुवर्णकम् ।
केतकीगन्धसंयुक्तं सूक्ष्मकेसरशोभितम् ॥ १५९ ॥

स्निग्धच्छायोष्णतीक्ष्णं कटुसुरभिगुणं कुङ्कुमं वातरक्तं
रक्तादीनूर्ध्वगात्रे प्रभरबहुरुजो नाशयेज्जाड्यहारि ।
त्वग्जान् कण्डूतिपामाप्रमुखविषमत्रान् ध्वंसयत्युग्ररोगान्
सौवर्णां कान्तिमङ्गे वितरति सततं भाग्यसौभाग्ययोगान् ॥१६०॥

केसरकुङ्कुममत्र पवित्रं मर्दनचारुवपुः कुरुते च ।
सौरभदेहकरं च सुकान्तं पुण्यवधूतिलकेषु च शस्तम् ॥ १६१ ॥

इति ।

जातिपत्री ।

जातिपत्री जातिकोशी सुमना (नः) पत्रिकाऽपि सा ।
मालतीपत्रिका पञ्चनाम्नी सौमनसा इति ॥ १६२ ॥
जातिपत्री कटुस्तिक्ता सुरभिः कृमिनाशिनी ।
वक्त्रवैशद्यजननी जाड्यदोषनिकृन्तनी ॥ १६३ ॥
मालतीपत्रिका ज्ञेया सुमनःपत्रिकाऽपि च ।
जातिपत्री जातिकोशस्तथा सौमनसायनी ॥ १६४ ॥

जातिपत्री कटुस्तिक्ता लघूष्णा रुचिवर्णकृत् ।
कफकासवमिश्वासतृष्णाक्रिमिविषापहा ॥ १६५ ॥

जायफलम् ।

जातीफलं जातिसस्यं शालूकं मालतीफलम् ।
मज्जासारं जातिसारं पुटं च सुमनःफलम् ॥ १६६ ॥
मदेशौण्डं जातिसुतं पुटं सौमनसं फलम् ।
जातीफलं कषायोष्णं कटु कण्ठामयार्तिनुत् ॥ १६७ ॥
वातातिसारदोषघ्नं वृष्यं दीपनदं लघु ।
जातीफलं रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु ॥ १६८ ॥
कटुकं दीपनं हृद्यं स्वर्यं श्लेष्मानिलापहम् ।
निहन्ति मुखवैरस्यं मलदौर्गन्ध्यकृष्णताम् ।
कृमिकासवमिश्वासशोषपीनसहृद्रुजः ॥ १६९ ॥

सूक्ष्मैला ।

सूक्ष्मैला मूत्रकृच्छ्रार्श(ः) श्वासकासकफापहा ।
एला तिक्ता च लघ्वी स्यात् कफवातविषव्रणान् ।
बस्तिकण्ठरुजो हन्ति मुखमस्तकशोधनी ॥ १७० ॥
भद्रैला कटुका पाके रसेऽपि(चा)अग्नि(नल)कृल्लघुः ॥ १७१ ॥
रूक्षोष्णा रोचनी श्वासकफपित्तास्रकासहा ।
हन्ति हृल्लासहृत्कण्डूशिरोबस्त्यास्यरुग्वमीन् ॥ १७२ ॥
एलाद्वयं छर्दिषु मूत्रकृच्छ्रे
मन्देऽनले पथ्यमरोचके च ।
स्वादुः सुशीतो मधुरस्य(श्च)पाके
अरोचकं हन्ति च जातकोशः ॥ १७३ ॥
एलाद्वयं शीतलतिक्तमुष्णं(कं)
सुगन्ध(न्धि) पित्तार्तिकफापहारी(रि) ।
करोति हृद्रोगमलार्तिबस्ति-
पुंस्त्वघ्नमत्र स्थविरो(रा)गुणाढ्यः(ढ्या) ॥ १७४ ॥

लवङ्गम् ।

लवङ्गं शीतलं तिक्तं चक्षुष्यं भुक्तलो(रो)चनम् ।
वातपित्तकफघ्नं च तीक्ष्णं मूर्धरुजापहम् ॥ १७५ ॥

लवङ्गं सोष्णकं तीक्ष्णं विपाके मधुरं हिमम् ।
वातपित्तकफामघ्नं क्षयकासास्रदोषजित् ॥ १७६ ॥
लवङ्गं कटुकं तिक्तं रूक्षं हृद्यं हिमं लघु ।
चक्षुष्यं पवनं हन्ति शूलानाहक्षतक्षयान् ।
कफपित्तास्रतृट्कासश्वासाध्मानविषपीनसान् ॥ १७७ ॥
पिपास(सा)यामनुत्क्लेशे लवङ्गस्याम्बु शस्यते ॥ १७८ ॥

अथ शुण्ठ्यार्द्रकम् ।

ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः ।
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ॥ १७९ ॥
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ।
कुष्ठे पाण्डामये कृच्छ्रे रक्तपित्ते नवज्वरे ।
दाहे निदाघे शरदि नैव पूजितमार्द्रकम् ॥ १८० ॥

चन्दनः ।

भद्रश्रियं हिमं तिक्तं हृद्यमाल्हादनं लघु ।
वर्ण्यं बलासपित्तघ्नं तृष्णादाहविषप्रणुत् ॥ १८१ ॥
श्रीखण्डं कटुतिक्तशीतलगुणं स्वादे कषायं कियत्
पित्तभ्रान्तिवमिज्वरकृमितृषासन्तापशान्तिप्रदम् ।
वृष्यं वक्त्ररुजापहं प्रतनुते कान्तिं तनौ देहिनां
लिप्तं सुप्तमनोजसिन्धुरमदारम्भातिसौरभ्यदम् ॥ १८२ ॥
स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।
ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥ १८३ ॥
श्रेष्ठं कोटरकर्परोपकलितं सुग्रन्थि सद्गौरवं
छेदे रक्तमयं तथा च विमलं पीतं च यद् घर्षणे ।
स्वादे तिक्तकटुः सुगन्धिबहुलं शीतं यदल्पे(ल्पं)गुणे
क्षीणं चान्द्रि(र्धे)गुणान्वितं तु कथितं तच्चन्दनं मध्यमम् ॥१८४॥
श्रेष्ठं मलयसम्भूतं यावनेषु च मध्यमम् ।
बर्बरेष्वधमं प्रोक्तं पाञ्चालयवनादिषु ॥ १८५ ॥
सर्वाण्येतानि तुल्यानि रसतो वीर्यतस्तथा ।
अत्रापि चोत्तमं विद्याद् ग्रन्थिखर्परकोटरम् ॥ १८६ ॥

आर्द्रच्छिन्नं पित्तहरं शुष्कं छिन्नं तु वातनुत् ।
आर्द्रशुष्कं तु यच्छिन्नं तच्च श्लेष्महरं परम् ॥ १८७ ॥

श्रीखण्डं शम्बरं पीतं पतङ्गं रक्तचन्दनम् ।
बर्बरं हरिगन्धं च चन्दनं सप्तधा स्मृतम् ॥ १८८ ॥

इति चन्दनम् ।

नारीकेरफलम् ।

नारिकेलो रसफलः सुतुङ्गः कूर्चशेखरः ।
दृढनीलो मी(नी)लतरुर्मङ्गल्योच्चतरुस्तथा ॥ १८९ ॥

तृणराजस्कन्धतरुर्दाक्षिणात्यो दुरारुहः ।
लाङ्गली त्र्यम्बकफलस्तथा दृढफलस्ति(स्थि)थि: (ति:) ॥ १९० ॥

लतावृक्षः चोच इति ।

चोचस्य फलमत्र्यक्षं तोयगर्भं पुटोदकम् ।
जले जलकरङ्कोऽस्य करङ्कस्तु फलास्थिनि ॥ १९१ ॥

नारिकेरं हिमं स्निग्धं स्वादु पाके रसं गुरु ।
तर्पणं पाचनं वृष्यं बृंहणं बलमांसकृत् ॥ १९२ ॥

विष्टम्भि दुर्जरं हृद्यं श्लेष्मलं बस्तिशोधनम् ।
दाहक्षतक्षयहरं वातपित्तास्रनाशनम् ॥ १९३ ॥

स्निग्धं स्वादुरसं विपाकमधुरं हृद्यं जडं दुर्जरं
पित्तघ्नं कृमिवर्धनं मदकरं वातामयध्वंसनम् ।
आमश्लेष्मविकोपनं प्रशमनं वह्नेः श्रमध्वंसनं
कन्दर्पस्य बलं ददाति नितरां तन्नारिकेलीफलम् ॥ १९४ ॥

दालचिनी । (त्वक्)

त्वचं त्वग्वल्कलं भृङ्गं वराङ्गं मुखशोधनम् ।
शाकलं सिंहलं वन्यं सुरसं रामवल्लभम् ॥ १९५ ॥

उत्कटं बहुगन्धं च विजु(ज्जु)लं य(च)वनप्रियम् ।
एला(लाट)पर्णं गन्धवल्कं वरं शीतं वसुक्षिती ॥ १९६ ॥

त्वचं च कटुकं शीतं कफकासविनाशनम् ।
शुक्रा(क्रा)मशमनं चैव कण्ठशुद्धिकरं लघु ॥ १९७ ।

गुडत्वगुत्कटं हृद्यं तनुकं स्वर्णभूमिकम् ।
एलापर्णं च शकलं त्वक्कोचं वल्कलं त्वचम् ॥ १९८ ॥
घनं रामाप्रियं भृङ्गं वराङ्गं सुरसं वरम् ।
वराङ्गं कटुकं तिक्तं तीक्ष्णोष्णं मधुरं लघु ॥ १९९ ॥
पित्तलं कफवातघ्नं हृद्बस्तिगदजन्तुजित् ।
पीनसारुचिकण्ड्वामवातदुर्नामशुक्रहृत् ॥ २०० ॥

तज दालचिनी ।

अथ कर्पूरः ।

पोतासो भीमसेनस्तदनु सितकरः शङ्करावाससंज्ञः
पांशुः पिञ्जोज्ज(ब्ज)सारस्तदनु हिमयुता वालुका जूटिका च ।
पश्चादस्यास्तु सार(तुषारः)स्तदुपरि सहिमः शीतलः पचि(त्रि)काख्या-
(ख्यः) कर्पूरस्येति भेदा गुणरससहिता वैद्यदृष्टयैव दृश्याः ॥२०१॥
कर्पूरः शिशिरस्तिक्तः कटुः श्लेष्मास्रपित्तजित् ।
तृषाविदाही कण्ठस्थदोषघ्नोऽक्षिरुजापहः ॥ २०२ ॥

साधारणः ।

कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णोऽस्रदाहदः ।
चिरस्थो दाहशोफघ्नः सधौतः शुभकृत् परः ॥ २०३ ॥
शिरो मध्यं तलं चेति कर्पूरस्त्रिविधः स्मृतः ।
शिरःस्तम्भाग्रजं(सञ्)जातं मध्यं पर्णतले तलम् ॥ २०४ ॥
भास्वद्विशदं पुलकं शिरोजातं तु मध्यमम् ।
सामान्यपुलकं स्वच्छं तले चूर्णं तु गौरव(क)म् ॥ २०५ ॥
स्तम्भगर्भस्थितः(तं) श्रेष्ठः(ष्ठं) स्तम्भबाह्ये च मध्यमः(मम्) ।
स्वच्छमीषद्धरिद्राभं शुभ्रं(भं) तं(तन्)मध्यजं(मं)स्मृतम् ।
अदृढं शुभ्ररूक्षं तु पुलकं बाह्यजं वदेत् ॥ २०६ ॥

कर्पूरलक्षणम् ।

स्वच्छं भृङ्गाभपत्रं लघुतरविशदं तोलने तिक्तकं चेत्
स्वादे शैत्यं सुहृद्यं बहुलपरिमलामोदसंरम्भदायि ।
निःस्नेहं दार्ढ्यपत्रं शुभतरमिति चेद्राजयोग्यं प्रशस्तं
कर्पूरं चान्यथा चेद्बहुतरमशने स्फोटदाह(यि)व्रणस्य ॥२०७॥

पोतासः ।

चीनकश्चीनकर्पूरः कृत्रिमो धवलः पटुः ।
मेघसारस्तुषारश्च द्वीपकर्पूरजः स्मृतः ॥ २०८ ॥

चीनकः कटुतिक्तोष्ण ईषच्छीतःकफापहः ।
कण्ठदोषहरो मेध्यः पाव(च)नः कृमिनाशनः ॥ २०९ ॥

इति चीनकर्पूरः ।

कर्पूरो मधुरस्तिक्तः सुरभिः शीतलो लघुः ।
चक्षुष्यो लेखनो वृष्यः कफमेदोविषापहः ॥ २१० ॥

दाहतृष्णास्यवैरस्यमलदौर्गन्ध(न्ध्य)नाशनः ।
ईशावासो हिमसंज्ञः पोताश्रय इति त्रिधा ॥ २११ ॥

अपक्के कथ्यते भेदः कर्पूरे तु भिषग्वरैः ।
ईशावासो भृशं श्वेतो हिमसंज्ञस्तु पाण्डुरः ॥ २१२ ॥

श्वेतः पोताश्रयः सर्वे रसवीर्यविपाकतः ।
प्रभावेनापि तैः(ते) प्रोक्ताः पूर्वपूर्वगुणाधिकाः ॥ २१३ ॥

तत्रापि यश्च क्षुद्रस्तु स्फटिकाभः स उत्तमः ।
ईशावासो मदोन्मादश्रमतृष्णाङ्गदाहनुत् ॥ २१४ ॥

कृमिकासक्षयस्वेदहरो भेदी वृषत्वकृत् ।
तृड्दाहमोहशमनः स्वेदनः कटुको रसे ॥ २१५ ॥

वृष्यश्च धवलः शीतः कर्पूरो हिमसंज्ञकः ।
पोताश्रयस्तु कर्पूरस्तृषादाहास्रपित्तनुत् ॥ २१६ ॥

श्लेष्मघ्नः शीतलो वृष्यः सुस्वादुः कटुतिक्तकः ।
पक्वस्तु द्विविधः प्रोक्तः सदलो निर्दलस्तथा ॥ २१७ ॥

दृढश्च पीतवर्णश्च विशेषाल्लघुतां गतः ।
भास्करो विशदः श्लेष्मवातघ्नोष्णः श्रियावहः ॥ २१८ ॥

सकटुः कृमिकण्डूघ्नः सरो मेदविषापहः ।
कासाश्वीव(लास) (ष्ठीला)गलग्राहसुप्तजिह्वत्वनाशनः ।
जलश्रु(स्रु)ति कृमीन् हन्ति दीपनः पित्तकोपनः ॥ २१९ ॥

उदयभास्करकर्पूरः । बरास इति भाषायां प्रसिद्धः ।

त्रिमल्लटीकायाम् ।

अथ ग्रन्थान्तराद् बरासक्रिया ।

एला कङ्कोलकं वालं कर्षार्धं तु पृथक् पृथक् ।
चूर्णं सूक्ष्मतरं कुर्यात् कर्पूरः सूर्यभागिकः ॥ २२० ॥
स्थालीमध्ये विनिक्षिप्य तस्योपरि च वाटिकाम् ।
स्थापयित्वा ततो मुद्रां गोधूमपिष्टकेन च ॥ २२१ ॥
वाटिकायां जलं क्षिप्त्वा वह्नौ त्वङ्गाररूपिणी ।
तावत्तप्ये(पे) जलं यावद्भवेत्त्वङ्गसहिष्णु च ॥ २२२ ॥
कर्पूरेणोपरिस्थेन तच्चूर्णं तेन मेलयेत् ।
तदा भवेदिदं सत्यं कर्पूरं भीमसेनकम् ॥ २२३ ॥

(इति ताम्बूलमञ्जरी)

प्रथमे पृष्ठे लिखिताः श्लोकाः ।

वसिष्ठः

एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं तु अधिकेनैव दुःखदः(दम्) ॥ १ ॥

एकद्वित्रिचतुःपञ्चषड्भिः पूगफलं(लैः) क्रमात् ।
लाभोऽलाभः सुखं दुःखमायुर्मरणमेव च ॥ २ ॥

भारद्वाजः ।

क्रमुकं पञ्चनिष्कं स्यात् ताम्बूल्याश्च पलद्वयम् ।
गुञ्जाद्वयं चूर्णमानं ताम्बूलक्रममुत्तमम् ॥ ३ ॥

इक्षोर्विकारा मतयः कवीनां
गवां रसो बालकभाषणानि ।
ताम्बूलमन्नं युवतीकटाक्षा
एते पदार्था न वसन्ति नाके ॥ ४ ॥

ताम्बूलं व्रतियतिदीक्षिता वनस्थाः ।
सा जह्यात् पतिरहिता च कामिनी या ॥ ५ ॥

ताम्बूलं मधु कुसुमस्रजो विचित्राः
कान्तारं सुतरुवनं विलासवल्यः ।
गीतानि श्रवणहराणि मिष्टमन्नं
क्लीबानामपि जनयन्ति पञ्चबाणम् ॥ ६ ॥

अतितरबलवति शीते पुम्भिः सेव्यस्तकारसमुदायः ।
ताम्बूलं तरुणवधूस्तूलं तैलं तनूनपात् तरणिः ॥ ७ ॥

List of Abbreviations

1 अ. म.	(1)	अजीर्णमञ्जरी or अमृतमञ्जरी by काशिराज. Published with Marāthī translation in निघण्टुरत्नाकर, Part I, Nirnaya Sagar, Bombay 1936.
	(2)	अजीर्णमञ्जरी by काशिराज. Oriental Institute Baroda Ms. No. 1142 आयुर्वेद No. 1.
2 अ. स.		अष्टाङ्गसङ्ग्रहः by वाग्भट. Edited by Vaidya Rāmacandra Śāstrī Kinjavadekar. Citraśālā Press, Poona, 1940.
3 अ. हृ.		अष्टाङ्गहृदयम् by वाग्भट. Chowkhamba Sanskrit Series, Banaras, 1939.
4 आ. भू.		आचारभूषणम् by Tryambaka Oka. Published by H. N. Apte, Ānandāśram, Poona, 1908.
5 आ. म.		आचारमयूखः by Bhaṭṭa Nīlakaṇṭha, Edited by J. R. Gharpure, Bombay, 1921.
6 आचा.		आचारेन्दुः by Tryambaka Mate. Pub. Ānandāśram, Poona, 1909.
7 आ. महो.		आयुर्वेदमहोदधिः by सुषेण. Oriental Institute Baroda. Ms. No. 1580 Āyurveda 35; also known as सुषेणवैद्यक.
8 क्षे. कु.	(1)	क्षेमकुतूहलम् by क्षेमशर्मा. Nirṇayasāgar Press, Bombay, 1920.
	(2)	क्षेमकुतूहलम् by क्षेमशर्मा. Oriental Institute, Baroda. Ms. No. 1656. Āyurveda 51.
9 च. दी.		चण्डिकोपास्तिदीपिकाग्रन्थः by Jagadguru Śaṅkarācārya Śrīvidyā-nṛsiṁhabhāratīswāmī. Kolhapur, 1946.
10 च. च.		चर्याचन्द्रोदयः with Hindi translation. Pub. Khemarāja Śrīkṛṣṇadāsa, Bombay. Śaka 1826.
11 ज्यो. नि.		ज्योतिर्निबन्धः by शिवराज. Edited by R. S. Vaidya, Ānandāśram, Poona, 1919.
12 द्र. गु.		द्रव्यगुणः by चक्रपाणिदत्त. With Hindi translation. Pub. Veṅkateśwar Press, Kalyan, 1925.
13 ध. नि.		राजनिघण्टुसहितो धन्वन्तरीयनिघण्टुः Edited by Nārāyaṇa Vitthala Purandare; Ānandāśram, Poona, 1896.
14 नि. आ.		निघण्टु आदर्श Published by B. G. Shah, Hasot, District Broach, Parts I and II.

15	नित्यो.		नित्योत्सवः By Umānandanātha. G. O. S. No. XXIII. Edited by Mahādeva Śāstrī, B.A. Revised and enlarged by Swāmī Trivikrama Tīrtha. Third Edition. Oriental Institute, Baroda, 1948.
16	नि. सि.		निर्णयसिन्धुः By Kamalākara Bhaṭṭa. Text with Marāthī translation. Nirṇaya Sāgar Press, Bombay, 1935.
17	प. वि.	1	पथ्यापथ्यविबोधः By कैयदेव. Oriental Institute, Baroda. Ms. No. 648. Āyurveda No. 109.
		2	पथ्यापथ्यविबोधः By कैयदेव. Oriental Institute, Baroda. Ms. No. 3558, Āyurveda No. 110.
		3	पथ्यापथ्यविबोधको ग्रन्थः—कैयदेवनिघण्टुः—श्रीकैयदेवविरचितः—प्रथमो भागः—ओषधिवर्गः। Edited by Surendra Mohan, B.A. Published by Meharchanda Laxmandas, Lahore. March 1928.
18	प. क.		परशुरामकल्पसूत्रम्। रामेश्वरकृतवृत्तिसहितम्। Edited by A. Mahādeva Śāstrī, B.A. Second edition by Sākarlāl Śāstrī Dave, Oriental Institute, Baroda 1950.
19	प. ध.		पराशरधर्मसंहिता or पराशरस्मृतिः। माधवाचार्यकृतटीकासहिता। आचारकाण्डम्।.प्रथमोऽध्यायः। Edited by Pandit Vāman Śāstrī Islāmpurkar, Bombay, 1814.
20	बृ. सं.		Varāhamihira's Bṛhatsaṁhitā with an English Translation and notes by P. V. Subrahmaṇya Śāstrī and V. M. R. Bhatt;, Bangalore City, 1947.
21	बृ, यो.		बृहद्योगतरङ्गिणी—त्रिमल्लभट्टविरचिता. Ānandāśram, Poona, 1913.
22	बृ. नि.		बृहन्निघण्टुरत्नाकरः Part II. Text with Hindi translation. Khemarāja Śrīkṛṣṇadāsa, Bombay, Śaka 1818.
23	भा. प्र.		भावप्रकाशः—पूर्वखण्डान्त :—भाषाटीकासमेत : Chowkhamba, Banaras, 1938.
24	भा. नि.		भावप्रकाशनिघण्टु :—आमयिकप्रयोगादिबृहद्विमर्शोपेतः। Chowkhamba, Banaras, 1940.
25	भो. कु.		भोजनकुतूहलम् by रघुनाथशर्मा. Oriental Institute, Baroda. Ms. No. 1914. Āyurveda No. 131.
26	म. नि.	1	मदनपालनिघण्टु :—मदनपालनृपतिना विरचितः। Published by Jīvānanda Vidyāsāgar, Calcutta, 1902.
		2	मदनपालनिघण्टु : With भाषाटीका. Published by Khemarāja Śrīkṛṣṇadāsa, Bombay, Saṁvat 1966.
		3	सार्थमदनपालनिघण्टु : Text with Marāthī translation by B. D. Kulkarni. Published by Y. G. Dixit, Poona.

27	यो. र.	1	योगरत्नाकरः Ānandāśrama, Poona, 1900.
		2	„ Ed. by Paṇḍita Sadāśiva Śāstrī Joshi. Chowkhamba, Banaras 1939.
28	रा. नि.		राजनिघण्टुसहितो धन्वन्तरीयनिघण्टुः Edited by Narayana Vitthal Purandare. Ānandāśrama, Poona 1896.
29	रु. र.		रुचिवधूगलरत्नमाला. Oriental Institute, Baroda. Ms. No. 10964. Āyurveda. No. 212.
30	वि. क.		श्रीमद्वैखानसे श्रीमहर्षिमरीचिप्रणीतानन्दादिसंहितामहाशास्त्रे श्रीविमानार्चनाकल्पः । Madras, 1926.
31	वी. मि.	1	वीरमित्रोदयः—म. म. मित्रमिश्रविरचित : । आह्निकप्रकाश : । Chowkhamba, Banaras.
		2	परिभाषाप्रकाशः । „ „
		3	संस्कारप्रकाशः । „ „
32	वै. र.		वैद्यरत्नम् by केदारभट्ट. ज्वालाप्रसादमिश्रकृतभाषाटीकासमेत. Khemarāja Śrīkṛṣṇadāsa, Bombay. Śaka 1835.
33	वैद्या.		वैद्यामृतम् by Moreśwara, Son of Māṇika Bhaṭṭa. Oriental Institute, Baroda. Ms. No. 1210, Āyurveda 259.
34	सु.		सुश्रुतसंहिता—मूलमात्रम् Nirṇayasāgar Press, Bombay, 1945.
35	सु. वै.		सुषेणवैद्यक—भाषाटीकासमेत. Khemarāja Śrīkṛṣṇadāsa, Bombay. Śaka 1817.
36	सू. मु.		सूक्तिमुक्तावली—जल्हणविरचिता. Edited by Embar Kṛṣṇamācārya G. O. S. No. LXXXII. Oriental Institute, Baroda, 1938.
37	सौ. क.		सौभाग्यकल्पद्रुमः or सौभाग्यकल्पतरुः by अच्युत. Oriental Institute, Baroda, Ms. No. 1903. Dharmaśāstra No. 1446.
38	श. क.		शब्दकल्पद्रुमः By Rajā Sir Rādhākānta Deva, Calcutta, Śaka 1808.
39	शा. नि.		शालिग्रामनिघण्टुः By Lālā Śāligrāmajī Vaiśya. Published by Khemarāja Śrīkṛṣṇadāsa, Venkateśwar Press, Bombay, 1912.
40	ह. नि.		हरीतक्यादिनिघण्टुः Text with Hindi translation. Nirṇayasāgar Press, Bombay, Śaka 1813.
41	Ch.		Chapter
42	Fo.		Folio
43	L		Line
44	P.		Page
45	V.		Verse

ORIGINAL SOURCES OF TĀMBŪLAMANJARĪ VERSES WITH THEIR VARIATIONS IN READINGS

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
1	सु. वै. P. 135 ताम्बूलवर्गः	पूगीफलं सुहृद्यम्	पौगं फलं च हृद्यम्
2	,,	—	—
3	आचा. P. 342 वैद्यः।	विशदं कृमिनाशनं कफहरं कामाग्निसन्दीपनम् स्त्रीणां भाषणभूषणं रतिकरं शोकस्य विच्छेदनं ताम्बूले विहिता:	मधुरं कफनाशनं कृमिहरं दुर्गन्धिनिर्णाशनम् वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनम् ताम्बूलस्य सखे
	ज्यो. नि. P. 236, V. 22	कृमिनाशनं कफहरं कामाग्निसन्दीपनम् दुर्गन्धिनिर्नाशनं	कफनाशनं कृमिहरं दुर्गन्धिनिर्णाशनम् कामाग्निसन्दीपनम्
	ध. नि. P. 134, V. 4.	—	—
	बृ. यो. P. 102, XVII तरङ्ग	कृमिनाशनं कफहरं	कफनाशनं कृमिहरं
	भा. नि. P. 172, quoted in विमर्श from ध. नि.	दौर्गन्ध्यदोषापहम् स्त्रीसम्भाषणभूषणं धृतिकरं स्वर्गेऽप्यमी	दुर्गन्धिनिर्णाशनम् वक्त्रस्याभरणं विशुद्धिकरणं स्वर्गेऽपि ते
	यो. र. 1, P. 35, V. 63 ,, 2, P. 55, V. 172	क्रिमिनाशनं कफहरं	कफनाशनं कृमिहरं
	रा. नि., P. 131, V. 4	—	—
	सू. मु., P. 402	दुर्गन्धनिर्णाशकम् स्त्रीसम्भाषणभूषणं रुचिकरं शोकस्य विच्छेदकम्	दुर्गन्धिनिर्णाशनम् वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं
5	नि. सि. तृतीय परिच्छेद पूर्वार्ध, P. 254 चण्डेश्वरः।	विलासाय हिताय च	ताम्बूलं योजयेद्भिषक्
	वी. मि. 3. P. 249. दीपिकायाम्।	सार्धे विलासाय हिताय च	सार्धं ताम्बूलं योजयेद्भिषक्

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
6	नि. सि. तृतीयपरिच्छेद पूर्वार्ध, P. 254. चण्डेश्वरः।	मूलार्क चित्र हरीन्द्र ताम्बूलभक्षणविधिर्मुनिभिः प्रदिष्टः।	मूलाश्वि मैत्र हरीन्दु ताम्बूलनूतनदलाद्यशनं शिवाय।
	वी. मि.—3. P. 250 दीपिकायाम्।	हरीन्द्र शुभाय	हरीन्दु शिवाय
7	आ. भू. P. 308 भोजनकुतूहले भो. कु. Fo. 80	ताम्बूलक्रम उत्तम :	ताम्बूलक्रममुत्तमम्
8	आचा. P. 341 पारिजाते	—	—
9 L. 1	अ. स.—सूत्रस्थान Ch. III, V. 38	—मेकं पूगं च	—मेकपूगं च
L 1-2	प. वि. I, Fo. 166	—	—
L. 3	बृ. यो. VII तरङ्ग P. 301, V. 48	यात्युच्चैर् दशकं	नात्युच्चैर् अधिकं
L. 2	सु. वै. ताम्बूलवर्ग P. 136, V. 7	पूग	पूगं
10 L 2	प. वि. I Fo. 166	—	—
L. 1	बृ. यो. VII तरङ्ग, P. 101, V. 48 L. 2, 49 L. 1	सखदिर योग्य	सखदिरं योज्य
L. 2	सु. वै. ताम्बूलवर्गः P. 136, V. 7	—	—
11	प. वि. Fo. 166	समपत्रे फलाधिके चूर्णाधिके	समपत्रः फलेऽधिके चूर्णाधिक्ये
	सु. वै. ताम्बूलवर्ग P. 136, V. 8	—पत्र रागो फलाधिके चूर्णाधिके गन्धिः	—पत्रः रागे फलेऽधिके चूर्णाधिक्ये दुर्गन्धः

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
12	रा. नि. P. 132, V. 21	चूर्णाधिक्ये साराधिक्ये खादिरे शोषदात्री चूर्णाधिक्ये पित्तकृत् पूतिगन्धा	पूगाधिक्ये चूर्णाधिक्ये सोष्णादुर्गन्धदात्री साधिक्ये चेत खादिरे शोषदात्री
13	बृ. सं. Ch. 77, P. 615, V. 36	विगन्ध	विगन्धि
	बृ. नि. Part II दिनचर्या P. 694	विगन्ध	विगन्धि
14 L 1-2	प. वि. 1 Fo. 166	रोचनदीपनं	दीपनपाचनं
L 3-4	बृ. यो. P. 101, V. 47	खदिरं	खादिरं
L 3-4	यो र. 1 P. 35, V. 72 2 P. 55, V 182.	पूगाधिकं प्रभाते स्यात् मध्याह्ने खदिराधिकम् । चूर्णाधिकं निशायां तु	प्रभाते पूगमधिकं मध्याह्ने खादिरं तथा निशायां तु तथा चूर्णं
L 1-2	सु. वै. ताम्बूलवर्गः P. 136, V. 10	रोचनदीपनं	दीपनपाचनं
15	ज्यो. नि. P. 236, V. 21	खदिरसारेण सुशोभितम् खदिरसारेण	खदिरसारं तु सुशोभनम् खदिरसारं तु
16 L 1	ज्यो. नि. P. 236, V. 23	प्रातःकाले फलाधिक्यं मध्यतः	प्रातः पूगाधिकं कुर्यात् मध्यमे
	प. वि. 1 Fo. 166	—	—
	सु. वै. ताम्बूलवर्ग P. 136, V. 9	—	—
17 L 1	ज्यो. नि. P. 236, V. 23, L. 2	विवर्धते	विवर्धयेत्
L 2	बृ. यो. VII तरङ्ग P. 101, V. 48, L. 1	एतत्ताम्बूलमुचितं	ताम्बूलमुच्यते चैतत्
18	बृ. यो. तरङ्ग XVII, P. 101, V. 48, L. 1, V. 49, L. 2	—	—

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
19	आ. भू. P. 308 भोजनकुतूहले	दशजन्म दरिद्रः स्यान्मरणे न हरिं स्मरेत् ।	सप्तजन्म दरिद्रत्वमन्ते न स्मरते हरिम् ।
	आचा. P. 342 पारिजाते वसिष्ठः ।	अकृत्वा च सप्तजन्म दरिद्री स्यादन्ते विष्णुं न संस्मरेत् ।	अनिधाय सप्तजन्म दरिद्रत्वमन्ते न स्मरते हरिम् ।
	ज्यो. नि. P. 235, V. 16	विष्णुं न विन्दति	न स्मरते हरिम् ।
	भो. कु. प्रथमपरिच्छेद. Fo. 80.	विना चूर्णं विना पर्णं दशजन्म दरिद्रस्तु मरणे न हरिं स्मरेत् ।	अनिधाय मुखे पर्णं सप्तजन्म दरिद्रत्वमन्ते न स्मरते हरिम् ।
	भो. कु. द्वितीयपरिच्छेद. Fo. 67.	विष्णुं न संस्मरेत् ।	न स्मरते हरिम् ।
	रा. नि. P. 132, V. 19	मतिभ्रंशो दरिद्री स्यादन्ते स्मरति नो हरिम् ।	सप्तजन्म दरिद्रत्वमन्ते न स्मरते हरिम् ।
	वी. मि. । P. 487	अकृत्वा च	अनिधाय
	वसिष्ठः	दशजन्म दरिद्रस्तु मरणे न हरिस्मृतिः ।	सप्तजन्म दरिद्रत्वमन्ते न स्मरते हरिम् ।
20 L. 2	आ. म. P. 84 वसिष्ठः	पापसम्भवः	चायुषः क्षयः
L. 2	ज्यो. नि. P. 235, V. 13	पापसम्भवः	चायुषः क्षयः
L. 2	प. ध. P. 434 वसिष्ठः	,,	,,
L. 1-2	बृ. यो. XVII तरङ्ग P. 102, V. 49 L 2, V. 50 L 1.	—	—
L. 2	भा. नि. P. 173.	पापसञ्चयः	चायुषः क्षयः
L. 1-2	यो. र. । P. 36, V. 74 L. 2, V. 73, L. 2	पापसम्भवः	चायुषः क्षयः
	यो. र. 2. P. 56, V. 184, L. 2 V. 183, L. 2	,,	,,
L. 2	वी. मि. । P. 485 वसिष्ठः ।	पापसम्भवः	चायुषः क्षयः

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
L. 2	आ. भू. P. 308.	पापसम्भवः	चायुषः क्षयः
,,	आचा. P. 341 वसिष्ठः	,,	,,
L. 1-2	नि.[1] र. Part I P. 316	,,	,,
,,	भा. प्र. Ch. V. P. 135	,,	,,
,,	भो. कु. Part I Fo. 80	,,	,,
L. 2	वी.[2] मि. 4. P. 220	,,	,,
L. 1-2	श. क. Vol. II P. 605 on ताम्बूल. राजवल्लभः।	नायुरग्रे विषं मध्येऽलक्ष्मीर्व्यवस्थिता। वसेद् पापसञ्चयः	आयुरग्रे यशो लक्ष्मीर्मध्ये व्यवस्थिता भवेद् चायुषः क्षयः
L. 1-2	शा. नि. P. 257	मध्ये लक्ष्मीर्व्यवस्थिता पापसञ्चयः	लक्ष्मीर्मध्ये व्यवस्थिता चायुषः क्षयः
L. 2	,, P. 1197	पापसम्भवः	चायुषः क्षयः
L. 2	स. स्मृ.[3] 1 Fo. 173	,,	,,
L. 1	,, 2 P. II Fo. 25	अग्रतः श्रीर्यशो मध्ये विष्णुः प्रतिष्ठितः	आयुरग्रे यशो लक्ष्मीर्मध्ये व्यवस्थिता
21	आ. भू. P. 308 आ. म. P. 84 वसिष्ठः आचा. P. 341 वसिष्ठः	हरेदायुः जीर्णपर्णं क्षिपेदायुः हरेदायुः	हरेल्लक्ष्मीं चूर्णपर्णं हरेल्लक्ष्मीं हरेल्लक्ष्मीं

---

[1] नि. र. निघण्टुरत्नाकर Parts I and II. Nirṇayasāgara Press, Bombay, 1936.

[2] वी. मि. 4 वीरमित्रोदयः। म. म. मित्रमिश्रविरचितः। लक्षणप्रकाशः। Chowkhamba, Banaras, 1916.

[3] स. स्मृ. सदाचारस्मृतिः by आनन्दतीर्थ.

1 With the Commentary of रामाचार्य, Oriental Institute Baroda. Ms. Acc. No. 2619 स्मृति 180.

2 With आह्निककौस्तुभ Commentary by श्रीनिवास, O. I. Baroda Ms. Acc. No. 8809, स्मृति 178.

3 With a Commentary, O. I. Baroda, Ms. Acc. No. 8637, स्मृति 177.

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
L. 1	ज्यो. नि. P. 235, V. 14 L1	हरत्यायुः	हरेल्लक्ष्मीं
	प. ध. P. 434 वसिष्ठः	शीर्णपर्णं हरेदायुः	चूर्णपर्णं हरेल्लक्ष्मीं
L. 1	बृ. यो. XVII तरङ्ग P. 102, V. 50, L. 3	लक्ष्मीः	लक्ष्मीं
L. 2	,, ,, V. 50, L. 1	तथा मूलं मध्यं चास्य त्रिवर्जयेत् मध्यं पर्णस्य वर्जयेत्	च मूलं च शिरां चैव विशेषतः ,,
L. 1	भा. नि. P. 173 quoted in विमर्श.	हरेदायुः	हरेल्लक्ष्मीं
	भो. कु. P. I, Fo. 80	हरेदायुः तथा मूलं मध्यं पर्णस्य भक्षयेत्	हरेल्लक्ष्मीं च मूलं च शिरां चैव विशेषतः
	यो. र. 1 P. 36, V. 74 L. 1 and V. 73 L. 1 ,, 2 P. 56 V. 184 L 1 and V. 183 L 1	चूर्णपत्रं हरत्यायुः तथा मूलं मध्यं पर्णस्य वर्जयेत्	चूर्णपर्णं हरेल्लक्ष्मीं च मूलं च शिरां चैव विशेषतः ।
	वी. मि. 1 P. 485 वसिष्ठः	हरेदायुः	हरेल्लक्ष्मीं
L. 1	,, 4 P. 220	हरत्यायुः	,,
	शा. नि. P. 257	हरेदायुः मध्यं पर्णस्य वर्जयेत्	,, शिरां चैव विशेषतः
	स. स्मृ. 1 Fo. 173	हरेदायुः शिराश्चैव	हरेल्लक्ष्मीं शिरां चैव.
22 L. 1	आ. भू. P. 308	बुधः	नरः
L. 1	आ. म. P. 84 वसिष्ठः	जीर्णपर्णं बुधः	चूर्णपर्णं नरः
L. 1	आचा. P. 341 वसिष्ठः	चूर्णपत्रं भक्षयेत् सुधीः	चूर्णपर्णं खादयेन्नरः
L. 2	,, ,, व्यासः	—	—
L. 2	ज्यो. नि. P. 235 V. 17 L. 1	—	—

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
L. 1	प. ध. P. 434 वसिष्ठः	शीर्णपर्णं बुधः	चूर्णपर्णं नरः
L. 1	वी. मि. 1 P. 485 वसिष्ठः	बुधः	नरः
L. 2	,, 4 P. 220	पर्णमादाय	चूर्णमादाय.
L. 1	स. स्मृ. 1 Fo. 173	बुधः	नरः
L. 2	,, 3 Fo. 78	तर्जन्यां चूर्णलेपेन	तर्जन्या चूर्णमादाय
23	आचा. P. 341 व्यासः ज्यो. नि. P. 235, V. 17 वी. मि. 4 P. 220	वा खादयेत् ,, ,, शोक च	खादयते ,, ,, रौरवं
24	स. स्मृ. 3 Fo. 78	पृष्ठे मूले चूर्णपर्णे च	मूले पृष्ठे चूर्णपर्णेषु.
26	आचा. P. 341 स्मृत्यन्तरे	पत्रं	पर्णं
27	आचा. P. 341 व्यासः ज्यो. नि. P. 236, V. 18 भो. कु. P. II Fo. 67 वी. मि. 4, P. 220	अनैश्वर्यायुषी तथा ,, मूलतः मृत्युरनैश्वर्यायुषी तथा ,,	ऐश्वर्यं चौर्यमेव च ,, योगतः मृत्युरैश्वर्यं चौर्यमेव च. ,,
28	ज्यो. नि. P. 236, V. 20 वी मि. 4, P. 221	अङ्गुष्ठेन लेपश्चेत् प्रदायकः अङ्गुष्ठेन ताम्बूलं शर्म शोभनम्	अङ्गुष्ठस्य लेपेन प्रदायकम् अङ्गुष्ठस्य सर्वसिद्धिप्रदायकम्
29	आचा P. 341 स्मृतिमञ्जर्याम् ।	द्रवं सम्मृज्य पर्णकम्	खदिराक्तं सुपर्णकम्

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
	वी. मि. 1 P. 486 स्मृतिमञ्जर्याम् ।	द्रवं सम्मृज्य पर्णकम्	खदिराक्तं सुपर्णकम्
30	आचा. P. 364 ज्योतिर्निबन्धे	खादेन्न वा खादयेत्	नो खादेत् खादयते
	ज्यो. नि. P. 236 V. 19	ताम्बूलं वा खादयेत्	नो खादेत् खादयते
	भो. कु. Part II Fo. 67	दोष्णा न खातव्यं	हस्तेन नो खादेत्
	वी. मि. 4, P. 221	वामहस्ते न खादेत वा खादयेत्	वामहस्तेन नो खादेत् खादयते
L. 1	स. स्मृ. 2 Fo. 25	स्त्रीहस्तेन न खातव्यं वामहस्तेन वा पुनः	वामहस्तेन नो खादेत् स्त्रीहस्तेन तथैव च
40 L. 2	अ. स. सूत्रस्थाने Ch. III V. 35 L 1 P. 15	—	—
L. 1	अ. हृ. सूत्रस्थाने Ch. II V. 6 L 2 P. 7	नावन	धावन
L. 2	आचा. P.341 पारिजाते	—	—
L. 2	भो. कु. Part I Fo. 80	—	—
41	अ. स. सूत्रस्थाने Ch. III V. 35 L. 2, V. 36 L. 1 P. 15	—	—
L. 1	आचा. P. 341 परिजाते	कङ्कोलकर्पूर	कर्पूरकङ्कोल
,,	भो. कु. Part I Fo. 80	तक्कोल खदिरैः	कङ्कोल कटुकैः

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
	हेमाद्रिः[1]	कटुकं लताकस्तूरिकाफलम् ।	कटुकैर्लताकस्तूरीफलैः
42	नि. र. Part I Page 315	कषायकटुतिक्तकैः	कटुतिक्तकषायकैः
	प. वि. 1 Fo. 180	—	—
	बृ. नि. P. 693	कषायकटुतिक्तकैः	कटुतिक्तकषायकैः
	भा. प्र. Ch. V P. 134 V. 178 L. 1, V. 179 L. 2	,,	,,
L. 1	भो. कु. Part 1 Fo. 80	,,	,,
	यो. र. 1 P. 35 V. 58 L 1 V. 59 L. 2	—	—
	यो. र. 2 P. 54 V. 168 L. 1 V. 169 L. 2	—	—
	सु. सूत्रस्थाने Ch. 46 V. 485 L. 1 V. 486 L. 2	कषायकटुतिक्तकैः	कटुतिक्तकषायकैः
43	नि. र. Part I Page 315	पूगकर्पूरकस्तूरी-लवङ्गसुमनःफलैः कारिभिः	पूगैः कङ्कोलकर्पूर-लवङ्गसुमनाफलैः कारकैः
	प. वि. 1 Fo. 180	पूग-	पूगैः
	बृ. नि. P. 693	पूगकर्पूरकस्तूरी-सुमनं	पूगैः कङ्कोलकर्पूर सुमना
	भा. प्र. Ch. V P. 134 V. 178 L. 2 V. 179 L. 1	कर्पूरकस्तूरी सुमनःफलैः कारिभिः	कङ्कोलकर्पूर सुमनाफलैः कारकैः
L. 1	भो. कु. Part I Fo. 78	पूगकर्पूरकस्तूरी-सुमनःफलैः	पूगैः कङ्कोलकर्पूर-सुमनाफलैः

[1] अष्टाङ्गहृदयम् with आयुर्वेदरसायनम् by Hemādri, Oriental Institute, Printed Edition Acc. No. 1531 वैद्यक 6/2 Page 25.

अष्टाङ्गहृदयटीका—आयुर्वेदरसायनम्, by हेमाद्रि. Oriental Institute, Ms. Acc. No. 5858 Ayurveda 20. Fol. 24.

Serial No. of verses	Sources	Variations in reading	Reading in Tāmbūla-mañjarī
	यो. र. 1 P. 35 V. 58 L. 2 V. 59 L. 1 यो. र. 2 P. 54 V. 168 L. 2 V. 169 L. 1	पूगकर्पूरकस्तूरी- सुमन:फलै: कारिभि:	पूगै: कङ्कोलकर्पूर- सुमनाफलै: कारकै:
	सु. सूत्रस्थाने Ch. 46 V. 485 L. 2 V. 486 L. 1 P. 258	पूग- सुमन:–	पूगै: सुमना-
44	प्र.[1] र. परिच्छेद IV V. 12 Fo. 24	राजन् नि:सरति मुखाद्वाणी गृहात्	जिह्वा बहिर्न याति सहसा नम्रा
45	सु. चिकित्सास्थानम् Ch. XXIV V. 21 P. 585	कर्पूरजातीकक्कोल- लवङ्गकटुकाह्वयै: । सहितं पत्रं	कर्पूरं जातिकङ्कोलं लवङ्गं कटुकाह्वयम् विहितं तन्त्रं
	प. वि. 1 Fo. 165	कर्पूरजातिकङ्कोल- लवङ्गकटुकाह्वयै: पत्रं	कर्पूरं जातिकङ्कोलं लवङ्गं कटुकाह्वयम् तन्त्रं
	यो.[2] र. स. द्रव्याधिकार: Part I P. 197 V. 1031 L. 2, V. 1032 L. 1	जातीलवङ्गतक्कोल- कर्पूरकटुकाह्वयै: सञ्चूर्ण्य पूगै: सहितं पत्रं	कर्पूरं जातिकङ्कोलं लवङ्गं कटुकाह्वयम् सचूर्णपूगैर्विहितं तन्त्रं
46	आ. भू. P. 307 माधवीये वसिष्ठ: आ. म. P. 84 वसिष्ठ: आचा. P. 340	सुचूर्णेन समन्वितम् चूर्णेन च समन्वितम् ,,	चूर्णखादिरसंयुतम् ,, ,,

